ISSN: 2347-4491
UGC Journal No. 49095
IJF Impact Factor: 2.382

Vol. 7 No. 2 Issue 5 April-June, 2019

# अयन Ayan

An International Multidisciplinary Peer Reviewed Refereed Research Journal

Ayan An International Multidisciplinary Quarterly Refereed Research Journal

Editor-in-Chief
Dr. Bindu Bhushan Upadhyay

Executive Editor
Dr. Vikramaditya Rai

Editors
Dr. Vikash Kumar
Dr. Kumar Varun

- मध्य प्रदेश की गोंड जनजाति में गोदना : एक अलंकरण — *हेबा सईद* — 246-250
- मुगल काल में चित्रकला का इतिहास — *चन्द्र बहादुर सरोज, डा0 कैलाश नाथ सिंह* — 251-253
- भागवत महापुराण में वर्णित नवधा भक्ति की अवधारणा — *हेमलता* — 254-260
- **A Study of Attitude of Postgraduate Studentsof Banaras Hindu University towards Peace Education** — *Shubham Agrawal, Dr.Lalta Prasad* — 261-268
- साहित्ये रसाभासस्य महत्वम् — *डॉ. सुकदेव वाजपेयी* — 269-271
- निपातानामर्थवैज्ञानिकत्वम् — *डॉ. किरण आर्या* — 272-274
- समकालीन हिन्दी कविता और उसका देशज यथार्थ — *दिवाकर तिवारी* — 275-278
- योजनाकाल में भारत का औद्योगिक विकास — *डॉ0 विश्वनाथ पाण्डेय* — 279-282
- **A Review Study On Genetic Disorder Diseases** — *Ajaz Ur Rasool* — 283-287
- **Various Digital Preservation Procedures in University libraries** — *Ravi Kant Singh* — 288-292
- भोजराज का शृङ्गारविषयक : नवीन चिन्तन — *ओमकार शुक्ल* — 293-303
- यज्ञ विज्ञान और पर्यावरण — *मनन कुमार अग्रवाल, डा. राकेश वर्मा* — 304-307
- **Social Construction of Gender among Sindhi Women In India: *A sociological study based on Sindhi Community living In Varanasi.*** — *Dolly* — 308-312
- भारतेन्दु युगीन कविता और उनकी भाषा — *डॉ0 विकास कुमार* — 313-316
- बाजीराव मस्तानीयम् काव्य में प्रतिपादित न्याय व्यवस्था — *कु0 नेहा गुप्ता* — 317-320
- "राजसूय : एक राज्याभिषेक यज्ञ" — *अरिमा त्रिपाठी* — 321-327
- **The Change of Youth under Globalization & Borderless World** — *Dr. Narubet Papol* — 328-337
- **The Nature of Advertisements in the Early Newspapers of Kashmir (1924-1947)** — *Mr. Mubashar Bashir Khan, Dr. Iswar Parida* — 338-345

# निपातानामर्थवैज्ञानिकत्वम्

*डॉ. किरण आर्या*

*सहा. प्रा. संस्कृत–विभागः, डॉ. हरिसिंहगौरविश्वविद्यालयः, सागरम्*

संस्कृतभाषायाः मूलोदगमः ऋग्वेद इति सर्वेषां मतम्। तत एव वर्णाक्षर–पद–नामाख्यातोपसर्गनिपातानां प्रत्यायानां चाभिधानं क्रियते। अत एव गोपथब्राह्मणे ओंकारविषयकप्रष्नसमये – **को धातुः? किं प्रातिपदिकम्? किं नामाख्यातम्? किं लिंगम्? किं वचनम्? का विभक्तिः? कः प्रत्ययः? कः स्वर उपसर्गो निपातः? किं वै व्याकरणम्? को विकारः? कतिमात्रः? कतिवर्णः? कत्यक्षरः? कतिपदः? कः संयोगः? किं स्थानानुप्रदानकरणम्? शिक्षकाः किमुच्चारयन्ति? किं छन्दः? को वर्णः?** *1 इत्याद्यनेकप्रष्नानामुदभावना विद्यते, प्रष्नाष्चैते भाषाकलेवरं प्रति संकेतयन्ति। महाकविकालिदासेन रघुवंषेऽभिहितयोक्त्या– **लिपेर्यथावदग्रहणेन वाङ्मयं नदीमुखेनैव समुद्रमाविशत्***2 मैक्समूलर आधुनिकभाषासहयोगेन वैदिकवाङ्मयार्णवं प्रवेष्टुं शक्यत इति मैक्डोनल (वैदिकग्रामर पृ. 39) आदिविद्वांसः प्रमाणयन्ति। (लेक्चर्स आन द साईंस आफ लैंग्वेज पृ. 214) बरो ( दी संस्कृत लैंग्वेज पृ. 109) एवं च वैदिवाङ्मयार्णवः प्राचीनार्वाचीनभाषाधारासु विभक्तः सन् संस्कृतभाषामुखेन निजमौलिकस्रोत प्रख्यापयति। शब्दस्य साधुत्वं असाधुत्वं, वर्णागमः, वर्णविपर्ययः, वर्णनाषः, वर्णविकारः, धात्वर्थः, धात्वर्थातिषय इत्यादिसर्वनिर्णयः तत एव स्वीक्रियते।

संस्कृतभाषायां सकलष्शब्दराषिः चतुर्धा – नाम–आख्यात–उपसर्ग–निपातभेदेन विभक्तः दृष्यते। ऋग्वेदप्रमाणेन–

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।** *3 **चत्वारि श्रृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।।***4

अर्थात् चत्वारि पदजातानि—नामाख्यातोपसर्गनिपाताः, एषः शब्दषास्त्रीयविभागः, प्राचीनतरष्चानेन स्वरूपः प्रमाणीभवति। अनेनोद्धरणेनैतदपि दृढीभवति यत् नामाख्यातोपसर्गविभागस्य ऐतिहासिकं महत्त्वमपि विद्यत इति। अनयो ऋचोः व्याख्यातारः सर्वे वैयाकरणाः पदचातुर्विध्यमेव स्वीकुर्वन्ति। निरुक्तकारः यास्कः स्पष्टरूपेण उपर्युक्तमन्त्रव्याख्यावसरे चत्वारि पदजातानि–नामाख्यातोपसर्गनिपाताः (13.9) इति निगदति। आष्वलायनश्रौतसूत्रमपि विभागस्यास्य समर्थनं करोति – **चत्वारि वाक्परिमितानि पदानि यज्ञेन वाचः पदवीयमायन्** *5 अत्रैतत् प्रथितं भवति यत् ऋग्वेदादेव पदचातुर्विध्यं निर्धारितमिति। तस्माच्च कालात् अद्यावधि निपातपदस्यार्थः स्वीकृतो विद्यते। उक्तेषु तावत् प्रमाणेषु पदषब्दस्य प्रयोगः विद्यते तत्र पदषब्दस्यार्थः **सुप्तिङन्तं पदम्,*6 अर्थः पदम्, *7 वर्णसंघातः पदम् *8 विभक्त्यन्तं पदमिति*9** स्वीकृते सति चत्वारि–विषेषणेन युक्तः पदषब्दः नामाख्यातोपसर्गाः इत्येव समाधानयुक्तो भवति।

अत्र स्वरादिनिपातमव्ययम् *10 सूत्रानुसारेण निपात एव अव्ययमिति ज्ञातव्यम्। तत्र निपातानां संख्या अनियता दृष्यते। सकलसंस्कृतवाङ्मये निपातानां संख्या अनिष्चिता एव, महर्षिपतंजलिरपि – **को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानां संख्यामादेष्टुम्** *11 इत्युक्त्वा उदघोषयति। अन्येऽपि शौनक(बृहददेवता 2.95)क्षीरस्वामी(निपातोपसर्गवृत्ति 1.5)वररुचि(प्राकृतप्रकाष निपातप्रकरण(सूत्र16)इत्यादिवैयाकरणा अपि निपातानामनियतत्वमभिदधति। एते निपाता अनन्ताः, अर्थाष्चैते अनन्ताः। प्रयोजनगम्याः प्रयोगगम्याष्चैते भवन्ति। एतेषां प्रयोजनं क्वचिदर्थप्रवाहसंकोचे, क्वचिदर्थविस्तारे, क्वचित्तीक्ष्णतायाम्, क्वचिदर्थभूयस्त्वे, क्वचिच्छब्दप्रतिमापरिकल्पनायाम्, क्वचित् वाक्यसंयोगसंघटनायाम्, क्वचित् मनोभावसंकेते, क्वचित् दिषासंकेते, क्वचित् कालनियन्त्रणे भवति। आचार्यषौनकः कथयति–

**इयन्त इति संख्यानां निपातानां न विद्यते।**
**प्रयोजनवशादेव निपतन्ति पदे पदे।।** *12

अर्थात् निपातानां संख्याया इयत्ता न विद्यते ते प्रयोजनवषात् प्रतिपदं प्रयुज्यन्ते, प्रयोजनवषात् विभिन्नार्थाधीनाः भवन्ति, यतोहि ते अर्थवैचित्र्यात् स्वस्थानं बलवद्रूपेण प्राप्नुवन्ति। प्रक्रियासर्वस्वग्रन्थस्य प्रणेता नारायणभट्ट इह निगदति –

**अनन्ताः खल्वनन्तार्थाः स्वराद्याश्चादयोऽपि च।**
**असत्त्वपरतैवात्र चादीनां नियता मता।।** *13

अर्थात् स्वरादयष्चादयष्चापि अनन्ताः। अर्थाष्च तेषामनन्ताः। असत्त्वपरताकारणेनेह चादीनां संख्या अर्थष्च नियतः। संस्कृतवाङ्मये अनेकत्र सिद्धान्त एषः प्रतिपादितो भवति यत् – **उपसर्गविभक्तिप्रत्ययस्वरप्रतिरूपकाश्च निपाता** भवन्तीति *14 अर्थात् निपाताः उपसर्गप्रतिरूपकाः, विभक्तिप्रतिरूपकाः, प्रत्ययप्रतिरूपकाः, स्वरप्रतिरूपकाः भवन्ति। तत्र तावत् **उपसर्गप्रतिरूपकाः (उपसर्गैः निष्पन्नभूताः) निपाताः** यथा – परितः, अभितः, उत्तमः, सम्प्रति, अतितराम्, अवस्तात्, उत्तरात्, अनुकः इत्यादयः। **विभक्तिप्रतिरूपकाः निपाताः** – चिरेण, चिराय, चिरात्, चिरस्य, अंजसा, अन्तरा, अन्तरेण, अन्यतरस्याम्, इत्यादयः। **प्रत्ययरूपकाः निपाताः** – (तिङ्प्रत्ययरूपकनिपाताः) अस्ति, नास्ति, मन्ये शंके, आस, आह, भवतु, इत्यादयः। **स्वरप्रतिरूपकाः निपाताः** – अ, आ, इ, ई, उ, ऊ, ए, ओ, ऋ, ऐ औ इत्यादयः। एतेषामुपसर्गविभक्तिप्रत्ययनिपातानां नानारूपाणि प्रत्ययभेदकारणेन प्राप्नुवन्ति। यथा उद्वतः, उद्वत्सु, अन्तरा, अन्तरम् इत्यादि। एतदे कारणं यत् निपातानां अनन्तत्वं अनन्तार्थत्वं च भवति। तेषामनैयत्यकारणमिदमपि यत् केचन निपाताः सन्धिभूता अपि प्रयुज्यन्ते। संस्कृतवाङ्मये निपातानां सन्धिर्दृष्यते। यथा – क्वचित्, केचित्, कष्चन, कंचन, कदाचन, किंस्वित्, मैव, मैवम्, यद्यैव इत्यादयः। एवं च वक्तुं शक्यते यत् निपातानामनन्तत्वे सान्धिकनिपातानामपि योगदानं विद्यते।

अपि च यदा कष्चन निपातः व्यवहर्तृद्वारा पुनः पुनः अभ्यस्यते तदा कालप्रवाहे स शब्दः अर्थमूर्तिभूतः भवति तदा सः भिन्नवर्गीयशब्देन सह संयुज्य धातुसंज्ञामपि लभते। यथा – संग्रामः, संग्रामयते। वीरः वीर विक्रान्तौ–वीरयते। व्ययः, वि+अय गतौ–व्येति। निवासः, निवास आच्छादने–निवासयति। अर्थात् **एते धातुनिष्पन्नाः निपाताः, धातुक्रोडीकृतनिपाताः** सन्ति। **तथैव नामक्रोडीकृतनिपाताः अपि दृश्यन्ते** – आषा – आ+शद्लृ शातने। स्वर्गः– सु+ऋ गतौ। नरकः– नि+ऋ गतौ। व्याघ्रः – व्याजिघ्रति वि+आ+घ्रा गन्धोपादाने। परुषः, प्लक्षः, न्यर्कः इत्यादयः, एते नामक्रोडीकृतनिपाताः सन्ति। अनेकेषु स्थलेषु च निपातक्रोडीकृतधातवः नामरूपं गृह्णन्ति, यथा – आनुषक्, अनु+षंज संगे (आनुपूर्व्येण अर्थे), विष्वाहा – विषु+अहः विष्वाहः–विष्वाहा (सर्वदिवसेषु विद्यमानः), स्वागतम् अत्र स्वगा इति निपातेन स्वागतम् निष्पद्यते। सुगाः – सुन्दरमागमनम् स्वगा। स्वधा – सु+अद् भक्षणे। स्वस्ति – सु+अस् भुवि। स्वाहा – सु+ब्रूञ व्यक्तायां वाचि। एवं च क्वचित् निपातद्वयं सन्धिरूपेण तिष्ठति, क्वचित् धातोः निपातस्य च सन्धिर्दृष्यते। येन निपातानानियतत्वं भवति।

वस्तुतः भाषा द्विधा भवति – शब्दप्रसविनी, शब्दाहारिणी च। संस्कृतग्रीकलैटिनभाषाः शब्दप्रसविन्यः भाषाः सन्ति। हिन्दी अंग्रेजी गुजराती मराठी नेपाली जर्मनी फ्रेंचादिभाषाः शब्दाहारिण्यः भाषाः सन्ति। विचारस्यास्य प्रतिपादनं आधुनिकभाषावैज्ञानिकाः मैक्समूलर (लेक्चर्स आन दि साइंस आफ लैंग्वेज पृ. 273)–मोनियरविलियम्स (संस्कृत इंग्लिषडिक्षनरी पृ.215) –बरो (संस्कृत लैंग्वेज पृ. 49) आदयः कुर्वन्ति। अत्र एतत् वक्तुं शक्यते यत् न केवलं निपातपदेन निपातार्थे रूढा एव निपाता भवन्ति अपितु यौगिका अपि निपाता सन्तीति बोध्याः।

पदमंजरीकारहरदत्तमिश्रः अत्र कथयति यत् निपाताः सौत्रा अपि भवन्ति – **सौत्रा अपि निपाता भवन्तीति** *15 अतः भोस्, भगोस्, अघोस् एते सौत्राः निपाताः, एते चादिगणे पठितव्या इति। अनेन सिद्धं भवति यत् न केवलं धातवः सौत्राः भवन्ति अपितु उपसर्गा निपाताष्चापि सौत्राः (सूत्रे पठिताः) भवन्ति। यौगिकनिपातानामनन्तरमिह मनोभावसमलंकृतनिपाताः कथ्यन्ते। भाषायां मनोभावमूलकनिपातानामतिषयमहत्त्वं विद्यते। मानवः सर्वदा अनुभूतिगतसंवेदनाभिः मनोभावैष्च अनुप्राणितः भवति। मनोभावद्वारैव संकल्पविकल्पादिकं वर्धते। क्वचित् निपातद्वारा मानवः स्वमनोभावानामभिव्यंजनां कुर्वन्ति। चतुर्विधपदविभागेषु केवलं निपात एव सर्वोत्कृष्टत्वेन मनोभावानां प्रतिनिधित्वं कुर्वन्ति। अनेकानि वाक्यानि यस्यार्थस्याविष्करणे नैव समर्थाः भवन्ति तस्यार्थस्याविष्करणे एक एव निपात समर्थो भवति। प्रायः गम्भीरविचाराणामपि अभिव्यक्तिः निपातेन भवति।

आई.एस.एस.एन. 2347-4491

शब्दानां व्यवहारेषु या वीप्सा भवति सा मनोभावमूलकरूपा अर्थभूयस्त्वमूलकरूपा भवति। वस्तुतः निपातद्वारैव शब्दाः वाक्येषु पौनःपुन्येन आयान्ति। आचार्ययास्कपतंजलि आदयः सिद्धान्तस्यास्य समर्थनं कुर्वन्ति। यथा – अहो दर्षनीयाहो दर्षनीयेति। अत्र गुणातिषयस्त्वात् द्विरुक्तिः। दर्षनक्रियाभ्यासे तद्गुणातिषयं नैव स्पष्टं स्यात् यथा निपाताभ्यासेन भवति, एतत् अर्थभूयस्त्वमेव। निपातानां पुनरुक्तौ न दोषः इति अनेकेषां विदुषां मतम्, तत्र शान्तनुराचार्यस्य कथनम् –

**प्रकर्षकोपहर्षेषु स्वप्नदैन्यभयेषु च।**
**स्तुत्यभ्यासानुवादेषु पौनरुक्त्यं न दुष्यति।**

अर्थात् अतिषयप्रकर्षे, कोपे, हर्षे, स्वप्ने, दैन्ये, भये, स्तुतौ, अभ्यासे, ज्ञानार्थस्य पुनः कथने पुनरुक्तिदोषो न भवति। अतः निपातानां पौनरुक्त्यदोषात् वीप्सायां निपातानां प्रयोगः भवति। तेन निपाता यूथचरा अपि भवन्ति। तदपि कारणं निपातामनियतत्वे।

एवं च निपाताः अनेके भवन्ति। तेषां सन्धित्वात्, उपसर्गविभक्तिप्रत्ययादिरूपकत्वात् मनोभावमूलत्वात् पौनःपुन्यप्रयोगत्वाच्च तेषां सख्या नियता न दृष्यते। तेषु केचन द्योतकाः, केचनार्थवाचकाः केचन अर्थविरहिताः पदपूत्यर्थाः, केचन आगमाः केचन चानेकार्थसाधकाः भवन्ति।

**सन्दर्भसूची**


1 गोपथब्राह्मणे 1.24
2 रघुवंषे 3.8
3 ऋग्वेदे 1.164.45
4 ऋग्वेदे 4.58.3
5 आष्वालायनश्रौतसूत्रे 3.8
6 अष्टाध्यायी 1.4.14
7 षुक्लयजुर्वेद प्रातिषाख्य3.2
8 अर्थसंग्रह 2.10.28
9 महाभाष्य1.2.64
10 अष्टाध्यायी 1.1.
11 पातंजलमहाभाष्ये 2.1.1
12 बृहद्देवता 2.95
13 निपातप्रकरण 5
14 महाभाष्य 3. 2. 42
15 काषिकायाम् 8.3.1